# Shri Krishnaproktam Durga Stotram

# श्रीकृष्णप्रोक्तं दुर्गास्तोत्रम् २०

## Document Information

Text title : Shri Krishnaproktam Durga Stotram

File name : kRRiShNaproktaMdurgAstotram20.itx

Category : devii, devI, brahmavaivartapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | prakRRitikhaNDa | adhyAya 67pothI || 66/8-20||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2025

*sanskritdocuments.org*

# श्रीकृष्णप्रोक्तं दुर्गास्तोत्रम् २०

श्रीकृष्ण उवाच ।
त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी ।
त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका ॥ ७॥

कार्यार्थे सगुणा त्वं च वस्तुतो निर्गुणा स्वयम् ।
परब्रह्मस्वरूपा त्वं सत्या नित्या सनातनी ॥ ८॥

तेजस्स्वरूपा परमा भक्तानुग्रविग्रहा ।
सर्वस्वरूपा सर्वेशा सर्वाधारा परात्परा ॥ ९॥

सर्वबीजस्वरूपा च सर्वपूज्या निराश्रया ।
सर्वज्ञा सर्वतोभद्रा सर्वमङ्गलमङ्गला ॥ १०॥

सर्वबुद्धिस्वरूपा च सर्वशक्तिस्वरूपिणी ।
सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी ॥ ११॥

त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम् ।
दक्षिणा सर्वदाने च सर्वशक्तिस्वरूपिणी ॥ १२॥

निद्रा त्वं च दया त्वं च तृष्णा त्वं चात्मनः प्रिया ।
क्षुत्क्षान्तिः शान्तिरीशा च शान्तिः सृष्टिश्च शाश्वती ॥ १३॥

श्रद्धा पुष्टिश्च तन्द्रा च लज्जा शोभा दया तथा ।
सतां सम्पत्स्वरूपा श्रीर्विपत्तिरसतामिह ॥ १४॥

प्रीतिरूपा पुण्यवतां पापिनां कलहाङ्कुरा ।
शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनाम् ॥ १५॥

देवेभ्यः स्वपदो दात्री धातुर्धात्री कृपामयी ।
हिताय सर्वदेवानां सर्वासुरविनाशिनी ॥ १६॥

योगिनिद्रा योगरूपा योगदात्री च योगिनाम् ।

सिद्धिस्वरूपा सिद्धानां सिद्धिदा सिद्धयोगिनी ॥ १७॥

ब्रह्माणी माहेश्वरी च विष्णुमाया च वैष्णवी ।
भद्रदा भद्रकाली च सर्वलोकभयङ्करी ॥ १८॥

ग्रामे ग्रामे ग्रामदेवी गृहदेवी गृहे गृहे ।
सतां कीर्त्तिः प्रतिष्ठा च निन्दा त्वमसतां सदा ॥ १९॥

महायुद्धे महामारी दुष्टसंहाररूपिणी ।
रक्षास्वरूपा शिष्टानां मातेव हितकारिणी ॥ २०॥

वन्द्या पूज्या स्तुता त्वं च ब्रह्मादीनां च सर्वदा ।
ब्रह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम् ॥ २१॥

विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सताम् ।
मेधा स्मृतिस्वरूपा च प्रतिभा प्रतिभावताम् ॥ २२॥

राज्ञां प्रतापरूपा च विशां वाणिज्यरूपिणी ।
सृष्टौ सृष्टिस्वरूपा त्वं रक्षारूपा च पालने ॥ २३॥

तथाऽन्ते त्वं महामारी विश्वे विश्वैश्च पूजिते ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च मोहिनी ॥ २४॥

दुरत्यया मे माया त्वं यया सम्मोहितं जगत् ।
यया मुग्धो हि विद्वांश्च मोक्षमार्गं न पश्यति ॥ २५॥

इत्यात्मना कृतं स्तोत्रं दुर्गाया दुर्गनाशनम् ।
पूजाकाले पठेद्यो हि सिद्धिर्भवति वाञ्छिता ॥ २६॥

वन्ध्या च काकवन्ध्या च मृतवत्सा च दुर्भगा ।
श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम् ॥ २७॥

कारागारे महाघोरे यो बद्धो दृढबन्धने ।
श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् ॥ २८॥

यक्ष्मग्रस्तो गलत्कुष्ठी महाशूली महाज्वरी ।
श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात्प्रमुच्यते ॥ २९॥

पुत्रभेदे प्रजाभेदे पत्नीभेदे च दुर्गतः ।
श्रुत्वा स्तोत्रं मासमेकं लभते नात्र संशयः ॥ ३०॥

राजद्वारे श्मशाने च महारण्ये रणस्थले ।
हिंस्रजन्तुसमीपे च श्रुत्वा स्तोत्रं प्रमुच्यते ॥ ३१॥

गृहदाहे च दावाग्नौ दस्युसैन्यसमन्विते ।
स्तोत्रश्रवणमात्रेण लभते नात्र संशयः ॥ ३२॥

महादरिद्रो मूर्खश्च वर्षं स्तोत्रं पठेत्तु यः ।
विद्यावान्धनवांश्चैव स भवेन्नात्र संशयः ॥ ३३॥

इति श्रीब्रह्मवैवर्ते महापुराणे द्वितीये प्रकृतिखण्डे
नारदनारायणसंवादे दुर्गोपाख्याने दुर्गास्तोत्रं नाम षड्षष्टितमोऽध्यायः ॥ ६६॥

ब्रह्मवैवर्तपुराण । प्रकृतिखण्ड । अध्याय ६७पोथी ॥ ६६/८-२०॥

brahmavaivartapurANa . prakRRitikhaNDa . adhyAya 67pothI .. 66/8-20..

Proofread by PSA Easwaran

*Shri Krishnaproktam Durga Stotram*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*